श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ शततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ शततमः सर्गः ॥

## श्रीरामरावणयोर्युद्धं रावणस्य शक्त्या लक्ष्मणस्य मूर्च्छा रावणस्य युद्धात् पलायनं च

तस्मिन् प्रतिहतेऽस्त्रे तु रावणो राक्षसाधिपः।
क्रोधं च द्विगुणं चक्रे क्रोधाच्चास्त्रमनन्तरम् ॥ **6.100.1** ॥

मयेन विहितं रौद्रमन्यदस्त्रं महाद्युतिः।
उत्स्रष्टुं रावणो भीमं राघवाय प्रचक्रमे ॥ **6.100.2** ॥

ततः शूलानि निश्चेरुर्गदाश्च मुसलानि च।
कार्मुकाद् दीप्यमानानि वज्रसाराणि सर्वशः ॥ **6.100.3** ॥

मुद्गराः कूटपाशाश्च दीप्ताश्चाशनयस्तथा।
निष्पेतुर्विविधास्तीक्ष्णा वाता इव युगक्षये ॥ **6.100.4** ॥

तदस्त्रं राघवः श्रीमानुत्तमास्त्रविदां वरः।
जघान परमास्त्रेण गान्धर्वेण महाद्युतिः ॥ **6.100.5** ॥

तस्मिन् प्रतिहतेऽस्त्रे तु राघवेण महात्मना।
रावणः क्रोधताम्राक्षः सौरमस्त्रमुदीरयत् ॥ **6.100.6** ॥

ततश्चक्राणि निष्पेतुर्भास्वराणि महान्ति च।
कार्मुकाद् भीमवेगस्य दशग्रीवस्य धीमतः ॥ **6.100.7** ॥

तैरासीद् गगनं दीप्तं सम्पतद्भिः समन्ततः।
पतद्भिश्च दिशो दीप्ताश्चन्द्रसूर्यग्रहैरिव ॥ **6.100.8** ॥

तानि चिच्छेद बाणौघैश्चक्राणि तु स राघवः।
आयुधानि च चित्राणि रावणस्य चमूमुखे ॥ **6.100.9** ॥

तदस्त्रं तु हतं दृष्ट्वा रावणो राक्षसाधिपः।
विव्याध दशभिर्बाणै रामं सर्वेषु मर्मसु ॥ **6.100.10** ॥

स विद्धो दशभिर्बाणैर्महाकार्मुकनिःसृतैः।
रावणेन महातेजा न प्राकम्पत राघवः ॥ **6.100.11** ॥

ततो विव्याध गात्रेषु सर्वेषु समितिञ्जयः।
राघवस्तु सुसङ्क्रुद्धो रावणं बहुभिः शरैः ॥ **6.100.12** ॥

एतस्मिन्नन्तरे क्रुद्धो राघवस्यानुजो बली।
लक्ष्मणः सायकान् सप्त जग्राह परवीरहा ॥ **6.100.13** ॥

तैः सायकैर्महावेगै रावणस्य महाद्युतिः।
ध्वजं मनुष्यशीर्षं तु तस्य चिच्छेद नैकधा ॥ **6.100.14** ॥

सारथेश्चापि बाणेन शिरो ज्वलितकुण्डलम्।
जहार लक्ष्मणः श्रीमान् नैर्ऋतस्य महाबलः ॥ **6.100.15** ॥

तस्य बाणैश्च चिच्छेद धनुर्गजकरोपमम्।
लक्ष्मणो राक्षसेन्द्रस्य पञ्चभिर्निशितैस्तदा ॥ **6.100.16** ॥

नीलमेघनिभांश्चास्य सदश्वान् पर्वतोपमान्।
जघानाप्लुत्य गदया रावणस्य विभीषणः ॥ **6.100.17** ॥

हताश्वात् तु तदा वेगादवप्लुत्य महारथात्।
कोपमाहारयत् तीव्रं भ्रातरं प्रति रावणः ॥ **6.100.18** ॥

ततः शक्तिं महाशक्तिः प्रदीप्तामशनीमिव।
विभीषणाय चिक्षेप राक्षसेन्द्रः प्रतापवान्॥ **6.100.19** ॥

अप्राप्तामेव तां बाणैस्त्रिभिश्चिच्छेद लक्ष्मणः।
अथोदतिष्ठत् सन्नादो वानराणां महारणे॥ **6.100.20** ॥

सम्पपात त्रिधा छिन्ना शक्तिः काञ्चनमालिनी।
सविस्फुलिङ्गा ज्वलिता महोल्केव दिवश्च्युता॥ **6.100.21** ॥

ततः सम्भाविततरां कालेनापि दुरासदाम्।
जग्राह विपुलां शक्तिं दीप्यमानां स्वतेजसा॥ **6.100.22** ॥

सा वेगिता बलवता रावणेन दुरात्मना।
जज्वाल सुमहातेजा दीप्ताशनिसमप्रभा॥ **6.100.23** ॥

एतस्मिन्नन्तरे वीरो लक्ष्मणस्तं विभीषणम्।
प्राणसंशयमापन्नं तूर्णमभ्यवपद्यत॥ **6.100.24** ॥

तं विमोक्षयितुं वीरश्चापमायम्य लक्ष्मणः।
रावणं शक्तिहस्तं वै शरवर्षैरवाकिरत्॥ **6.100.25** ॥

कीर्यमाणः शरौघेण विसृष्टेन महात्मना।
न प्रहर्तुं मनश्चक्रे विमुखीकृतविक्रमः॥ **6.100.26** ॥

मोक्षितं भ्रातरं दृष्ट्वा लक्ष्मणेन स रावणः।
लक्ष्मणाभिमुखस्तिष्ठन्निदं वचनमब्रवीत्॥ **6.100.27** ॥

मोक्षितस्ते बलश्लाघिन् यस्मादेवं विभीषणः।
विमुच्य राक्षसं शक्तिस्त्वयीयं विनिपात्यते॥ **6.100.28** ॥

एषा ते हृदयं भित्त्वा शक्तिर्लोहितलक्षणा।
मद्बाहुपरिघोत्सृष्टा प्राणानादाय यास्यति॥ **6.100.29** ॥

इत्येवमुक्त्वा तां शक्तिमष्टघण्टां महास्वनाम्।
मयेन मायाविहिताममोघां शत्रुघातिनीम्॥ **6.100.30** ॥

लक्ष्मणाय समुद्दिश्य ज्वलन्तीमिव तेजसा।
रावणः परमक्रुद्धश्चिक्षेप च ननाद च॥ **6.100.31** ॥

सा क्षिप्ता भीमवेगेन वज्राशनिसमस्वना।
शक्तिरभ्यपतद् वेगाल्लक्ष्मणं रणमूर्धनि॥ **6.100.32** ॥

तामनुव्याहरच्छक्तिमापतन्तीं स राघवः।
स्वस्त्यस्तु लक्ष्मणायेति मोघा भव हतोद्यमा॥ **6.100.33** ॥

रावणेन रणे शक्तिः क्रुद्धेनाशीविषोपमा।
मुक्ताऽऽशूरस्यभीतस्य लक्ष्मणस्य ममज्ज सा॥ **6.100.34** ॥

न्यपतत् सा महावेगा लक्ष्मणस्य महोरसि।
जिह्वेवोरगराजस्य दीप्यमाना महाद्युतिः॥ **6.100.35** ॥

ततो रावणवेगेन सुदूरमवगाढया।
शक्त्या विभिन्नहृदयः पपात भुवि लक्ष्मणः॥ **6.100.36** ॥

तदवस्थं समीपस्थो लक्ष्मणं प्रेक्ष्य राघवः।
भ्रातृस्नेहान्महातेजा विषण्णहृदयोऽभवत्॥ **6.100.37** ॥

स मुहूर्तमिव ध्यात्वा बाष्पपर्याकुलेक्षणः।
बभूव संरब्धतरो युगान्त इव पावकः॥ **6.100.38** ॥

न विषादस्य कालोऽयमिति सञ्चिन्त्य राघवः।
चक्रे सुतुमुलं युद्धं रावणस्य वधे धृतः।
सर्वयत्नेन महता लक्ष्मणं परिवीक्ष्य च॥ **6.100.39** ॥

स ददर्श ततो रामः शक्त्या भिन्नं महाहवे।
लक्ष्मणं रुधिरादिग्धं सपन्नगमिवाचलम् ॥ **6.100.40** ॥

तामपि प्रहितां शक्तिं रावणेन बलीयसा।
यत्नतस्ते हरिश्रेष्ठा न शेकुरवमर्दितुम् ॥ **6.100.41** ॥

अर्दिताश्चैव बाणौघैस्ते प्रवेकेण रक्षसाम्।
सौमित्रेः सा विनिर्भिद्य प्रविष्टा धरणीतलम् ॥ **6.100.42** ॥

तां कराभ्यां परामृश्य रामः शक्तिं भयावहाम्।
बभञ्ज समरे क्रुद्धो बलवान् विचकर्ष च ॥ **6.100.43** ॥

तस्य निष्कर्षतः शक्तिं रावणेन बलीयसा।
शराः सर्वेषु गात्रेषु पातिता मर्मभेदिनः ॥ **6.100.44** ॥

अचिन्तयित्वा तान् बाणान् समाश्लिष्य च लक्ष्मणम्।
अब्रवीच्च हनूमन्तं सुग्रीवं च महाकपिम् ॥ **6.100.45** ॥

लक्ष्मणं परिवार्यैवं तिष्ठध्वं वानरोत्तमाः।
पराक्रमस्य कालोऽयं सम्प्राप्तो मे चिरेप्सितः ॥ **6.100.46** ॥

पापात्मायं दशग्रीवो वध्यतां पापनिश्चयः।
काङ्क्षितं चातकस्येव घर्मान्ते मेघदर्शनम् ॥ **6.100.47** ॥

अस्मिन् मुहूर्ते नचिरात् सत्यं प्रतिशृणोमि वः।
अरावणमरामं वा जगद् द्रक्ष्यथ वानराः ॥ **6.100.48** ॥

राज्यनाशं वने वासं दण्डके परिधावनम्।
वैदेह्याश्च परामर्शो रक्षोभिश्च समागमम् ॥ **6.100.49** ॥

प्राप्तं दुःखं महाघोरं क्लेशश्च निरयोपमः।
अद्य सर्वमहं त्यक्ष्ये निहत्वा रावणं रणे ॥ **6.100.50** ॥

यदर्थं वानरं सैन्यं समानीतमिदं मया।
सुग्रीवश्च कृतो राज्ये निहत्वा वालिनं रणे।
यदर्थं सागरः क्रान्तः सेतुर्बद्धश्च सागरे ॥ **6.100.51** ॥

सोऽयमद्य रणे पापश्चक्षुर्विषयमागतः।
चक्षुर्विषयमागत्य नायं जीवितुमर्हति ॥ **6.100.52** ॥

दृष्टिं दृष्टिविषस्येव सर्पस्य मम रावणः।
यथा वा वैनतेयस्य दृष्टिं प्राप्तो भुजङ्गमः ॥ **6.100.53** ॥

सुखं पश्यत दुर्धर्षा युद्धं वानरपुङ्गवाः।
आसीनाः पर्वताग्रेषु ममेदं रावणस्य च ॥ **6.100.54** ॥

अद्य पश्यन्तु रामस्य रामत्वं मम संयुगे।
त्रयो लोकाः सगन्धर्वाः सदेवाः सर्षिचारणाः ॥ **6.100.55** ॥

अद्य कर्म करिष्यामि यल्लोकाः सचराचराः।
सदेवाः कथयिष्यन्ति यावद् भूमिर्धरिष्यति।
समागम्य सदा लोके यथा युद्धं प्रवर्तितम् ॥ **6.100.56** ॥

एवमुक्त्वा शितैर्बाणैस्तप्तकाञ्चनभूषणैः।
आजघान रणे रामो दशग्रीवं समाहितः ॥ **6.100.57** ॥

तथा प्रदीप्तैर्नाराचैर्मुसलैश्चापि रावणः।
अभ्यवर्षत् तदा रामं धाराभिरिव तोयदः ॥ **6.100.58** ॥

रामरावणमुक्तानामन्योन्यमभिनिघ्नताम्।
शराणां च शराणां च बभूव तुमुलः स्वनः ॥ **6.100.59** ॥

विच्छिन्नाश्च विकीर्णाश्च रामरावणयोः शराः।
अन्तरिक्षात् प्रदीप्ताग्रा निपेतुर्धरणीतले ॥ **6.100.60** ॥

तयोर्ज्यातलनिर्घोषो रामरावणयोर्महान्।
त्रासनः सर्वभूतानां सम्बभूवाद्भुतोपमः॥ **6.100.61** ॥

स कीर्यमाणः शरजालवृष्टिभि -
    र्महात्मना दीप्तधनुष्मतार्दितः।
भयात् प्रदुद्राव समेत्य रावणो
    यथानिलेनाभिहतो बलाहकः॥ **6.100.62** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे शततमः सर्गः॥